# बोर्ड कृतिपत्रिका : मार्च २०१७

**समयः ३ होरात्रयम्।** **गुणाः ८०**

**सूचनाः**

i. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
ii. यथासूचनं आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।
iii. आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

## प्रथमः विभागः – गद्यम्।

**(अवबोधनम्, शब्दसम्पत्तिः, पृथक्करणम्)**

**१.अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [७]

**अ.१. अवबोधनम्। (केऽपि २ कृती कुरुत)** (१)

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।
बालनरेन्द्रस्य हस्तात् मूर्तिः पतिता। यतः तेन _______.
हस्ते मूर्तिः सम्यग् न धृता। / बालिका अश्वमार्गाद् दूरीकृता।

ii. कः कं वदति?
"वत्स नरेन्द्र, विरम शोकात्।" (१)

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।
नरेन्द्रेण क्रीता मूर्तिः गृहे भग्ना। (१)

जिज्ञासुः विचारशीलः बालनरेन्द्रः सदैव चिन्तनमग्नः आसीत्। एकदा मात्रादिष्टः दुर्गादेव्याः मूर्तिं क्रीत्वा स गृहमागच्छत्। दुर्गापूजामहोत्सवः नाम शक्तिपूजनमिति स जानाति स्म। गृहं निवर्तमानः सः शक्तेः स्वरूपचिन्तने मग्नोऽभवत्। अकस्मात् तस्य विचारमाला खण्डिता तुरगपदानां रवेण। तेन दृष्टं यत् मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति। स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत।

सहसा तेन दृष्टं यत् काचन बालिका मार्गे खेलने मग्नास्ति। सा अश्वयानागमनविषये न जानाति। सवेगम् अश्वयानं तस्याः कृते यमयानमेव। तद्विलोक्य नरेन्द्रस्य हस्ताद् मूर्तिः पतिता। तेन धावित्वा झटिति सा बालिका अश्वमार्गाद् दूरीकृता तस्याः मात्रे च प्रदत्ता। तस्याः मात्रा अश्रुपूर्णनयनाभ्यां तस्मै आशीर्वचनं दत्तम्।

यदा सः गृहमागतः तदा तेन ज्ञातं यत् तस्य हस्तात् च्युता मूर्तिः तत्रैव मार्गे भग्ना वर्तते। आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत्। तदा मात्रोक्तं "वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकायाः साहाय्यं कृत्वा, बालिकारूपशक्तिदेवतायाः एव पूजनं कृतम्।" धन्या सा माता धन्यश्च बालनरेन्द्रः।

**अ.२. शब्दज्ञानम्। (काः अपि ३ कृतीः कुरुत।)**

i. सन्धिविग्रहं कुरुत। (१)
यमयानमेव = _______ + _______ ।

ii. समूहेतरं पदं चिनुत। (१)
१. विचारशीलः, मण्डलाधिकारिणः, चिन्तनमग्नः। २. खण्डिता, भग्ना, च्युता।

iii. मञ्जूषातः उचितं विशेषणं चित्वा मेलनं कुरुत। (१)

| विशेषणम् | विशेष्यम् |
|---|---|
| _______ | बालनरेन्द्रः। |
| _______ | माता। |

(विचारमाला, धन्या, दुर्गादेवी, जिज्ञासुः)

iv. गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये _______, _______ । (१)

**अ.३. स्वमतप्रकटनम्:** (२)

माध्यमभाषया ३०/४० शब्दैः स्वमतं लिखत।

साम्प्रतं बालिकारूपशक्तिदेवतायाः पूजनम् आवश्यकम्।

**ब. गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।** [७]

**ब.१. अवबोधनम्। (केऽपि २ कृती कुरुत)** (१)

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

लेरसिया न केनापि समाहूतः। यतः _______ ।

(जुगुप्साकरम् अभद्रं च तस्य दर्शनम्। / ग्रामे तस्य परिचयः न आसीत्।)

ii. पूर्णवाक्येन उत्तरं लिखत। (१)

लेरसिया सर्वैः सह कथम् आचरति स्म?

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। (१)

लेरसिया स्वसहकारिभिः सह समीपवर्तिनं काञ्चन ग्रामं गतः।

पुरा यदा मिझोजनाः गणान् कृत्वा वसन्तः तदा तेषामेकस्य गणस्य प्रमुख आसीत् लेरसियानामा। अतीव दयालुः स गणप्रमुखः सर्वैः सह समभावेन आचरति स्म। धनवत्तां दारिद्र्यं वागणयित्वा स जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म।

कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कंचन ग्रामं गतः। तत्पूर्वं कदापि स तत्र न गतवान्। ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान्। कस्यश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत। तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत। तदनु स सहकारिभिः सह तं ग्रामं प्रविश्य मध्यचतुष्पथं यातः। तत्र ते सर्वे मार्गे समुपाविशन्। तत्रस्था ग्रामवासिन एतावदेव जानन्ति यदागता जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते परं न कोऽपि जानाति स्म तेषु कतमः लेरसिया इति।

लेरसियासहिता येऽन्ये जना आसन् ते ग्रामवासिभिर्जनैः स्वगृहं भोजनार्थमाहूताः। बहुना आतिथ्येन नृत्यगीतवादनैश्च सत्कृताः। परं लेरसिया न केनापि समाहूतः यतोऽतीव जुगुप्साकरमभद्रं च तस्य दर्शनम्। तेन न कोऽपि तं स्वगृहं नेतुं मनस्यकरोत्।

**ब.२. शब्दज्ञानम्। (काः अपि ३ कृतीः कुरुत।)**

i. सन्धिविग्रहं कुरुत। (१)

यतोऽतीव = _______ + _______ ।

ii. गद्यांशतः विलोमशब्दौ चित्वा लिखत। (१)

१. क्रूरः × _______ । २. पश्चात् × _______ ।

iii. मञ्जूषातः उचितं विशेषणं चित्वा मेलनं कुरुत। (१)

| विशेषणम् | विशेष्यम् |
|---|---|
| _______ | लेरसिया। |
| _______ | शरीरम्। |

(रूपहीनं, लिप्ता, गणप्रमुखः करुणापरौ)

iv. गद्यांशे आगते सप्तम्यन्तविभक्तिपदे लिखत। _______, _______ । (१)

**ब.३. पृथक्करणम्।** (२)

घटनाक्रमानुसारं वाक्यानि पुनर्लिखत।

i. लेरसियामहोदयस्य दर्शनं जुगुप्साकरमभद्रम्।

ii. लेरसिया मृत्तिकायाः लेपनं कृतवान्।

iii. लेरसिया अङ्गरसस्य विलेपनं कृतवान्।

iv. लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान्।

**क. संवादांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[७]**

**क.१. अवबोधनम्।** **(केऽपि २ कृती कुरुत।)**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **(१)**

पवनोर्जा सुरक्षिता। यतः _______ ।

(सा प्रदूषणमुक्ता! / सा मर्यादिता।)

ii. पूर्णवाक्येन उत्तरं लिखत। **(१)**

अर्वाचीनमहाराष्ट्रस्य भाग्यरेषा का?

iii. वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत।

सर्वैः अपारम्परिकान् उपायान् स्वीकृत्य पारम्परिकस्रोतसां परिरक्षणं कर्तव्यम्। **(१)**

**(कृष्णासुवर्णस्य)**

पार्थः – तस्योपस्कारार्थं महाप्रयासः आवश्यकः। भूमौ रन्ध्रं निर्माय निष्कास्य च तस्य संस्करणं क्रियते। तत्संस्करणाद् इन्धनतैलं, मृत्तैलं, स्वेदनतैलादिकं निष्पाद्यते। एतन्निसर्गाल्लभ्यते, तस्मात्तस्योपलब्धिः मर्यादिता।

श्रेया – निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादिता भवति।

पार्थः – सूर्यः पवनः जलमित्येतानि महाभूतानि। एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि। गोमयात् पर्णाविशेषाद्, अवकराच्च जैविकवायुः प्रभवति तथा एरण्डबीजान्मधुक – बीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते अणुभ्योऽपि ऊर्जा लभ्यते।

श्रेया – तथापि एतेषु सौरं स्रोतः अपरिमितम् अक्षयं, प्रदूषणमुक्तं च। 'कोराडी' इत्यत्र औष्णिक्याः ऊर्जायाः प्रकल्पः तथा ट्रॉम्बेतारा – पुरस्थौ द्वौ अणुविद्युत्–प्रकल्पौ प्रसिद्धौ। कोयना–जल–विद्युत्प्रकल्पस्तु अर्वाचीनमहाराष्ट्रस्य भाग्यरेषैव।

पार्थः – कुत्रचित् पर्वतेषु पवनचक्रिकाः स्थाप्यन्ते मरुतः साहाय्येन विद्युन्निर्मीयते। अपि सैव पवनोर्जा?

श्रेया – सत्यम्, सा पवनोर्जा प्रदूषणमुक्ता, सुरक्षिता, उपजीविकासाधिका च।

अथर्वः – एवमपारम्परिकान् उपायान् स्वीकृत्य पारम्परिकस्रोतसां परिरक्षणं च कर्तव्यं सर्वैः। येन धनसञ्चयो भवेत्, तेनैव राष्ट्रोन्नतिः स्यात्।

**क.२. शब्दज्ञानम्।** **(काः अपि ३ कृतीः कुरुत।)**

i. चतुर्थपदं लिखत। **(१)**

रेषैव : रेषा + एव : : सैव : _______ + _______।

ii. भिन्नार्थकशब्दौ लिखत। **(१)**

दण्डः, नाम, यष्टिः, शासनम्।

अ. राजा चौरं दण्डं करोति। अत्र दण्डः नाम _______।

ब. बालकः मार्जारं दण्डेन ताडयति। अत्र दण्डः नाम _______।

iii. मञ्जूषातः उचितं विशेषणं मेलनं कुरुत। **(१)**


| विशेषणम् | विशेष्यम् |
|---|---|
| _______ | ऊर्जा। |
| _______ | ऊर्जासाधनानि। |

(भाग्यरेषा, अपारम्परिकाणि, आवश्यकः, अपारम्परिकी)

iv. गद्यांशे आगते द्वे धातुसाधित-ल्यबन्त-अव्यये लिखत। _______, _______ । **(१)**

**क.३. पृथक्करणम्।**

वृक्षारेखाचित्रं पूरयत। **(२)**





**द्वितीय:: विभाग: – पद्यम्।**

**(पृथक्करणं, स्पष्टीकरणं, शब्दसम्पत्ति:, अन्वयपूर्ति:, स्मरणं, वृत्तज्ञानम्।)**

**२.अ. पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।**

**अ १. पृथक्करणम्।**

पद्यांशत: उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत। **(२)**




सस्यगर्भिणी धरणी हरिता
स्वेदबिन्दुभिर्यैरभिषिक्ता
तेषामेव श्रमेण फलिता हसति मेदिनीयम्
हरितक्रान्त्यास्तद् हरितत्वं ध्वजेऽपि पल्लवितम्।
ध्वजे स्थितेयं हरिताभा मां प्रेरयते सततम्
'जयतु किसानो' वदन्ती ह्यहं नमामि तं कृषकम्।।
समुपागतवति दैवादवहेलां कुटज मधुकरे मा गा:।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्य:।।

**अ.२. स्पष्टीकरणम्।**

कुटजान्योक्तिविषये स्पष्टीकरणं ३०/४० शब्दै: माध्यमभाषया लिखत। **(२)**

**ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

१. आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विज:।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे।।
अनन्तरं गर्ह्यमाण: सर्वैरनुशयान्वित:।
स विद्यासिद्धये तप्तुं तपो गङ्गातटं ययौ।।

२. यावच्चन्द्रार्कतारादिस्थिति: स्यादम्बराङ्गणे।
तावत्फारुकिवंशोऽसौ चिरं नन्दतु भूतले।।

**ब.१. शब्दज्ञानम्।**

i. पद्यांशत: पर्यायशब्दं लिखत। **(१)**

नगरे - ________। तीरं - ________।

ii. पद्यांशत: द्वे विशेषणे लिखत। तपोदत्त: - ________, ________। **(१)**

**ब. २. पद्यांशं पठित्वा रिक्तस्थानानि पूरयित्वा द्वितीय श्लोकस्य अन्वयं पुनर्लिखत।** **(२)**

यावत् ________ चन्द्रार्कतारादिस्थिति: स्यात् ________ असौ फारुकि ________ भूतले ________ नन्दतु।

**क. अधोदत्तेषु सुभाषितेषु द्वे सुभाषिते शुद्धे पूर्णे च लिखत।** **(४)**

१. नृपाणां ________ पराक्रमः।।
२. रागे ________ प्रशस्यते।।
३. अङ्गेन ________ रात्रिः।।

**ड. वृत्तनाम चिनुत।** **(१)**

अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति।।

(इन्द्रवज्रा / गीतिः / उपेन्द्रवज्रा)

**तृतीयः विभागः – स्थूलवाचनम्।**

**(पद्यम् – अवबोधनम्, पृथक्करणम्।)**

**३. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

**अ. अवबोधनम्।**

i. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।
भीमरायः मैत्रोपनामविद्वांसं निजशङ्काः पप्रच्छ। **(१)**

ii. एकपदेन उत्तरं लिखत।
'संस्कृता वाक् राष्ट्रभाषा भवतु' इति प्रस्तावस्य प्रमुखः कः? **(१)**

नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम्।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम्।।१।।
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः।।२।।
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम्।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः।।३।।
प्रत्युत्ततार मैत्रं गीर्वाणगिरैव भीमरायोऽपि।
श्रुत्वा तत्संवादं सर्वेऽप्यासन् चकितचकिताः।।४।।
वृत्तं तन्नैकेषु प्रकाशितं प्रमुखवृत्तपत्रेषु।
पाठं पाठं सर्वे प्रभावितस्तस्य चातुर्यात्।।५।।
प्रस्तावश्चर्चान्ते न पारितो नैकसांसदविरोधात्।
तेनाभवन् विषण्णाः सर्वे ये संस्कृते रक्ताः।।६।।
रात्रिंदिवं पठित्वा ग्रन्थान् नानाविधान् संहितार्थम्।
विरचय्य नूतनविधीन् स्त्रीदलितान् समावेशयत्तस्याम्।।७।।
अभ्यस्य नैकस्मृतीर् मनुभारद्वाजयाज्ञवल्क्याद्याः।
चर्चित्वा विद्वद्भिः प्रारूपं रचितं भीमरायेण।।८।।

**ब. पृथक्करणम्।**

i. पद्यांशतः द्वे विशेषणे चित्वा जालरेखाचित्रं पूरयत। **(१)**

नैकगिरां ________। ← संस्कृता वाक् → विदुषां ________।

ii. पद्यांशतः उचितशब्दौ चित्वा जालरेखाचित्रं पूरयत। **(१)**

भारद्वाजस्मृतिः

________ — भीमरायेण अभ्यस्य प्रारूपं रचितम् — ________

**चतुर्थः विभागः – लेखनकौशलम्।**

४. **यथानिर्देशं कृतीः कुरुत।** (केवलं ३ उपप्रश्नाः लेखनीयाः।)

अ. **परिच्छेदपूर्तिः।** (५)

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत।**

अद्यत्वे हॉकीक्रीडा जनानां ________ क्रीडा वर्तते। शतमीटरपरिमिते विशाले क्रीडाङ्गणे एकस्मिन् पक्षे एकादश क्रीडकानाम् अपरस्मिन् पक्षे च एकादशक्रीडकानाम् इतस्ततः धावतां दृश्यम् अतीव मनोहारि। यदा निपुणक्रीडकेन नीयमानः कन्दुकः परपक्षगोले ________ तदा दर्शकाः करतलध्वनिं कुर्वन्तः विजयिपक्षस्य उत्साहं वर्धयन्ति। यः दलः अधिकान् ________ करोति स विजयी भवति। आकाशवाणीयन्त्रात् हॉकीप्रतियोगितानां समाचारान् अनेके जनाः शृण्वन्ति अथ च दूरदर्शनयन्त्रेभ्योऽपि लक्षशः ________ क्रीडकानां खेलचातुर्यं ________ प्रसीदन्ति। हॉकीक्रीडा भारतीयानां राष्ट्रिया क्रीडा। भारतेन ऑलिम्पिकप्रतियोगितासु स्वर्णपदकं लब्धम्।

(प्रविशति, दृष्ट्वा, लोकप्रिया, दर्शकाः, गोलकान्)

ब. **निबन्धलेखनम्।** (५)

**३ पर्यायेषु १ विषयम् अधिकृत्य ५ वाक्यात्मकं निबन्धं लिखत।**

रक्षाबन्धनम्, भ्रमणध्वनिः, मयूरः।

क. **संस्कृतानुवादः।** (५)

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत।**

i. नदीचे पाणी स्वच्छ आहे.
River water is clean.
नदी का पानी साफ है।

ii. धूर्त कोल्ह्याची गोष्ट सांगा.
Tell the story of cunning jackal.
चतुर सियार की कहानी बता।

iii. सेनापती व्यूह रचतो.
Army chief arranges the array.
सेनापति व्यूह रचता है।

iv. न्यायाधीशाने अपराध्याला शासन करावे.
Justice should punish the guilty.
न्यायाधीश अपराधी को दण्ड / दण्डित करे।

v. कार्यक्रम केव्हा सुरू होईल?
When will the programme start?
कार्यक्रम कब प्रारंभ / शुरू होगा?

vi. वृक्ष पर्वतावर वाढतात.
The trees grow on the mountain.
पेड़ पर्वतों पर बढ़ते हैं।

vii. पक्षी झाडाच्या फांद्यांवर घरटी बांधतात.
The birds build the nests on the branches of trees.
पंछी (पक्षी) पेड़ की टहनियों पर घोंसले बनाते हैं।

viii. सर्व पर्वतांत हिमालय उंच पर्वत आहे.
Himalaya is the highest mountain among all mountains.
सभी पहाड़ों में हिमालय ऊँचा पहाड़ है।

ड. **वाक्यरचना।**

i. **धातूनां प्रयोगः - चतुर्षु धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत।** **(३)**

१. गम् – १ प. प. २. कथ् – १० उ. प ३. वि + तृ – १ प. प. ४. दा – १ प. प.

ii. **अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत।** **(२)**

१. मन्दिरस्य सर्वतः वृक्षाः सन्ति। २. माता बालकं सह वदति।

३. तस्मै गजाननस्य नमः। ४. सचिनः क्रिकेटक्रीडायाः निपुणः।

## पञ्चमः विभागः – व्याकरणम्।
### (उपयोजनकौशलम्)

५. **यथानिर्देशं कृतीः कुरुत।** (केवलं ५ उपप्रश्नाः लेखनीयाः।)

अ. **क्रियापदरूपैः आवलिपूरणम् कुरुत।** (८ पर्यायेषु ६ पर्यायाः लेखनीयाः।) **(३)**

**सर्वाणि रूपाणि तृतीयपुरुष-एकवचनस्य लेखनीयानि।**

| धातुः | द्वितीयभविष्यत्कालः | परोक्षभूतकालः | वर्तमानकालः | प्रथमभूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| गम् १ प.प. | ______ | ______ | गच्छति | ______ | ______ | गच्छेत् |
| कृ ८ आ.प | ______ | चक्रे | ______ | अकुरुत | ______ | ______ |

ब. **नाम + सर्वनाम्नां रूपैः आवलिपूरणम् कुरुत।** **(३)**

(८ पर्यायेषु ६ पर्यायाः लेखनीयाः।)

| विभक्तिः Case | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा Nominative | ______ | वणिजौ | ______ |
| तृतीया Instrumental | ______ | ______ | यशोभिः |
| षष्ठी Genitive | तव | ______ | ______ |
| तृतीया Instrumental | ______ | ______ | एभिः |

क. **धातुसाधितविशेषणैः कोष्ठकपूर्तिः।** **(३)**

(८ पर्यायेषु ६ पर्यायाः लेखनीयाः।)

मञ्जूषातः विशेषणानि चित्वा कोष्ठकपूरणं कुरुत।

| कर्म. भू. धा. वि., Past Passive Participle | क. वि. धा. वि., Potential Passive Participle | कर्त. भू. धा. वि., Past Active Participle | कर्त. व. का. धा. वि., Present Active Participle |
|---|---|---|---|
| | | | |
| | | | |

(अनुसरन्, कथितम्, गतवान्, कर्तव्यः, कृतवती, आस्वादनीया, वर्तमानः, लिप्ता)

ड. **समासाः।** (८ पर्यायेषु ६ पर्यायाः लेखनीयाः।) **(३)**

**कोष्ठक पूरणम् करुत।**

| | समासः | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| i. | उमासुतः। | ______। | षष्ठी तत्पुरुषः। |
| ii. | ______। | न श्रान्तः। | नञ् तत्पुरुषः। |
| iii. | कषायवर्णः। | कषायः इति वर्णः। | ______। |
| iv. | शिल्पकारः। | ______। | उपपद तत्पुरुषः। |
| v. | ______। | शक्तिम् अनुसृत्य। | अव्ययीभावः। |
| vi. | ______। | त्वरया सह यथा स्यात् तथा। | क्रियाविशेषणसह बहुव्रीहिः। |
| vii. | देशविदेशेभ्यः | देशाः च विदेशाः च। तेभ्यः | ______। |
| viii. | ______। | तपः एव धनं यस्य सः। | बहुव्रीहिः। |

**इ. वाक्यपरिवर्तनम्।** (४ पर्यायेषु ३ पर्यायाः लेखनीयाः।) **(३)**

सूचनानुसारं वाक्यपरिवर्तनं कुरुत।

i. तेन धनिकेन सत्वरं सेवकः प्रेषितः। (प्रयोगपरिवर्तनं कुरुत।)

ii. दृष्टमात्रे तस्मिन् चित्रे तस्य मनः प्रहृष्टमेव। (यदा - तदा उपयुज्य वाक्यं पुनर्लिखत।)

iii. रामः वनं गच्छति। (कर्तृस्थाने कैकेयी उपयुज्य वाक्यं पुनर्लिखत।)

iv. त्वं वीररसविषये कथय। (त्वम् इत्यस्य स्थाने भवान् उपयुज्य वाक्यं पुनर्लिखत।)

**फ. सङ्ख्यावाचकाः। रिक्तस्थानपूर्तिः कुरुत।** (४ पर्यायेषु ३ पर्यायाः लेखनीयाः।) **(३)**

i. साहित्ये _______ रसाः सन्ति। (९)

ii. जनाः _______ वैद्येषु नावधानं ददति। (६)

iii. शाकुन्तलस्य _______ अङ्कः अतीव सुन्दरः अस्ति। (४था / ४th)

iv. देवक्याः _______ अपत्यं नाम भगवान् श्रीकृष्णः। (आठवे / ८th)

## षष्ठः विभागः – अनुवादकौशलम्।

**६. यथानिर्देशं कृतीः कुरुत।**

**अ. संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत।** **(४)**

भारतदेशेन सर्वस्मै जगते दत्तः सर्वोत्कृष्टः उपहारः नाम पञ्चतन्त्रं नाम ग्रन्थः। विष्णुशर्मा नाम विद्वान् अस्य रचयिता। सः राजपुत्राणां रुचिं निरैक्षत। तेभ्यः पशुपक्षिणां विविधाः कथाः अकथयत्। 'मनोरञ्जनाद् उद्बोधनम्' एतत् तन्त्रं प्रभावपूर्णं जातम्। कथानां माध्यमेन दत्तं ज्ञानं राजपुत्रैः विनासायासैः आत्मसात् कृतम्। अल्पेन एव कालेन ते राजपुत्राः राजनीतिपारङ्गताः अभवन्।

**ब. संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **(४)**

एह्यागच्छ समाश्रयासनमिदं कस्माद् चिराद्दृश्यसे
का वार्ता ह्यतिदुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात्।
एवं ये समुपागतान्प्रणयिनः प्रल्हादयन्त्यादरा
तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा।।

**क. संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **(४)**

**दरिद्रः** - दिवंगतस्य शिवस्य अलङ्काराः चन्द्रः, गङ्गा, सर्पराजः वासुकिः आकाशेन नीताः।

**राजा** - ततः परम्।

**दरिद्रः** - ततः परमासन् तस्य गुणाः। तान् अन्ये विभज्य अनयन्।

**राजा** - के?

**दरिद्रः** - दानशीलतां उदारतां वीरतां च भवान् अनयत्। अन्ते अवशिष्टः एकः एव गुणः तमेव गृहीत्वा अहं भूलोके भ्रमामि। भिक्षाटनं करोमि सदा।